योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १७२

द्विसप्तत्यधिकशततमः सर्गः १७२

श्रीवसिष्ठ उवाच ।

एवं पृथ्व्यादिरहितः खमेवाद्यः प्रजापतिः ।

मनोमात्रमहं मन्ये संकल्पविटपी यथा ।। १

मन इत्यभिधानेन पश्चादास्था प्रकल्पिता ।

वार्यावर्तविवर्तेन प्रोत्थायावर्तता यथा ।। २

सत्तामात्रात्मनस्तस्य कुतो बुद्ध्यादयः किल ।

अविद्यमाने पृथ्व्यादौ खस्यानन्तस्य किं रजः ।। ३

न तस्य देहचित्तादि नेन्द्रियाणि न वासनाः ।

सदप्येतत्सदा तस्य न किंचिदपि विद्यते। ।। ४

प्राक्तनस्य प्रजेशस्य मुक्तत्वात्कथमेव च ।

भूयः संभवति प्राज्ञ न स्मृतिर्न च संभवः ।। ५

न भवत्येव मुक्तानां स्मृतिर्देहोदयः पुनः ।

न देशकालावर्तत्वमावर्तानां सतामिव ।। ६

यदि वापि भवेत्किंचित्स्मृत्या देहादि तस्य तत् ।

तदपृथ्व्यादिभिः शान्तं संकल्पनगरं तनु ।। ७

यथा संकल्पशैलस्य दृश्यमानमपि स्फुटम् ।

पृथ्व्यादिरहितं रूपं तद्विराड्वपुषस्तथा ।। ८

स्मृतिश्च संभवत्येव न कदाचन काचन ।

एषा लौकिकबुद्ध्या या सा सद्बुद्ध्या न विद्यते ।। ९

श्रीराम उवाच ।

कथं न संभवत्येषां स्मृतिः स्मृतिमतां वर ।

स्मृतेश्चासंभवे कस्माद्गुणो गुणगणाकर ।। १०

श्रीवसिष्ठ उवाच ।

दृश्ये हि संभवत्येषा कार्यकारणतात्मनि ।

तद्भावाभावसंपन्ना न तु संभवति स्मृतिः ।। ११

आब्रह्मस्तम्बपर्यन्तं दृश्यं किंचिन्न विद्यते ।

यत्र तत्र कथं कीदृक् कुतः स्यात्संभवः स्मृतेः ।।१२

भूत्वा भावे हि दृश्यस्य स्मरणं स्मृतिरुच्यते ।

दृश्यमेव न यत्रास्ति तत्रैताः कलनाः कुतः ।। १३

अत्यन्ताभाव एवास्य दृश्यस्य किल सर्वदा ।

सर्वं ब्रह्मेति सत्यार्थास्तत्स्मृतेः कलनाः कुतः ।। १४

स्मृतिर्न संभवत्येव तस्मादाद्या प्रजापतेः ।

आकारवत्त्वमेवास्य शुद्धज्ञानात्मनः कुतः ।। १५

स्मर्तव्यं भाववशतः स्मृतिर्नास्त्येव लौकिकी ।

स्मृत्यर्थस्त्वन्यदीयोऽस्ति सत्यात्मा त्वमिमं श्रृणु ।। १६

भूतस्यान्तः पदार्थस्य स्मरणं स्मृतिरुच्यते ।

पदार्थस्तु न चैवास्ति न भूतो न भविष्यति ।। १७

एवं हि खल्विदं ब्रह्म परमेवाचलं यतः ।

अनादिमध्यपर्यन्तं कुतः स्मृत्यादयस्ततः ।। १८

सर्वात्मत्वमपदार्थात्म चिद्व्योमकचनं तु यत् ।

व्यवहारेऽप्यलं शान्तं स्मृत्या तच्छब्दितं मया ।। १९

तदेतत्स्मरणं नाम स्वभावकचनं हि तत् ।

तेनाभ्यस्तोऽथ बाह्यार्थः सादृश्यादवभासते ।। २०

यद्यत्संवेद्यते किंचित्तत्स्वभावं स्वभावयत् ।

तेनावभासते योऽर्थस्तस्य स्मृत्यभिधा कृता ।। २१

अविद्यमानं भातीव यथा दृश्यं तथा स्थितिः ।

भातैवाविद्यमानैव मृगतृष्णा यथोद्यता ।। २२

सर्वात्मनि स्थिताः सत्ये याः कचन्ति सुसंविदः ।
ता एवाभ्यासरूढार्थाः सादृश्यात्स्मृतयः स्मृताः ।।
काकतालीयवद्भान्ति सर्वात्मनि सुसंविदः ।
स्वाङ्गभूताः स्वतः स्वस्थास्ता एव स्मृतयः कृताः।। २४
यद्यत्कचति सद्रूपं स्वाङ्गं सर्वात्मनः स्वतः ।
तदभ्यस्तार्थसादृश्यात्स्मृतिरित्युच्यते बुधैः ।। २५
हेतौ लब्धेऽप्यलब्धे वा पवनस्पन्दवद्विदः ।
ता एवाभ्यासरूढार्थाः सादृश्यात्स्मृतयः कृताः ।।२६
काकतालीयवद्भान्ति यास्ताः स्मृत्यभिधाः कृताः ।
यथा तवैतेऽवयवाः कचन्ति न कचन्ति च ।। २७
स्थिता एवात्मनि तथा सर्वाः सर्वात्मिका विदः ।
मिथ्याज्ञानमया यद्वदर्था घटपटादयः ।। २८
तद्वत्स्मृतिपदार्थस्य किं भ्रमस्य विचार्यते ।
दृश्यस्यासंभवाज्ज्ञस्य स्मृतिर्नास्त्वेव तत्त्वतः ।। २९
स तथैकघनत्वाच्च चिद्व्योमत्वाज्जगत्स्थितेः ।
यथास्थितमिदं दृश्यमस्त्येवाज्ञस्य संप्रति ।। ३०
न मोक्षोपायकथनं न च जानामि तत्स्थितिम् ।
संदेहादिव जिज्ञासुस्तावन्मोक्षकथोच्यते ।। ३१
यावद्दृश्यं स्मृतिश्चैव संस्मृतिश्चास्य शाम्यति ।
अविद्यायास्तु मौर्ख्यस्य विमोहस्यात्यसंभवात् ।। ३२
अज्ञस्थो निश्चयोऽस्माकं न कदाचन गोचरः ।
यच्च यद्विषये नास्ति तन्नैवानुभवत्यसौ ।। ३३
रजन्यनुभवो भानोर्भवत्यङ्ग कथं वद ।
भातं वस्तुस्वरूपात्म चिन्मात्रे किंचिदेव यत् ।। ३४
तदभ्यस्तार्थसादृश्यात्तत्संस्कार इति स्मृतम् ।
आत्मस्वभावभूतानामपि चिद्व्योमरूपिणाम् ।। ३५

सर्वेषां परिकल्प्यानामाभासेऽप्यनवस्थितेः ।

एवं न संभवत्येव जगत्किंचित्कदाचन ।। ३६

दृष्टं मृगतृषेवाम्बु न तु तत्परमार्थतः ।

यदा त्वयं तदा स्वप्ने सर्गादौ चावभासते ।। ३७

चिद्व्योमैव परं सर्गपर्यायं स्वात्मनि स्थितम् ।

चिद्व्योमैवेत्थमाभातं न च्युतं सत्स्वरूपतः ।। ३८

आत्मनात्मनि रूपं वा सद्रूपमिव संस्थितम् ।

सर्गादावेव कचिते मिथ्या कचदपि स्थितम् ।। ३९

अतः कुतः क्वचिन्नाम हेयादेयादिभासनम् ।

नेदमाकारवत्किंचिन्नापि स्मृत्यात्मकं क्वचित् ।। ४०

कारणाभावतो भाति स्वरूपं परमात्मनः ।

आकारवत्त्वे यद्दुःखं भवेत्स्मृत्यां तदेव च ।। ४१

द्वयमेतदसत्तस्माद्बन्धो नाम न विद्यते ।

चिद्व्योम्नि भूतव्योमाभे शून्य एव यथास्थितम् ।।४२

स्थितं स्वरूपमजहद्भुवनार्काचलादिकम् ।

यथास्थितोग्रदिक्कालं जगत्त्वं रूपमत्यजत् ।। ४३

स्वमेवात्यजतो रूपं चिद्व्योम्न उदरे स्थितम् ।

स्वानुभूत्येकमात्रात्म प्रमातृस्वाप्नपत्तनम् ।। ४४

अपृथ्व्यादि कुतस्तत्र किल पृथ्व्यादयो वद ।

तद्भाति केवलं शान्तं चिदाकाशं तथात्मनि ।। ४५

सर्वादौ स्वप्नकाले च पृथ्व्यादेः संभवः कुतः ।

उद्भूयेव जगद्रूपाद्ब्रह्मसत्तात्मनात्मनि ।। ४६

करोति पृथ्व्याद्यभिधाः पश्चात्सत्यार्थदा इव ।

न स्मृत्यात्म न साकारं पृथ्व्यादीनामसंभवात् ।

न भ्रान्तिर्न विवर्तादि जगद्ब्रह्मात्म केवलम् ।। ४७

ब्रह्मेदमाकचति चारुजगत्स्वरूपं

तच्चैकमेव कचनाकचनात्मनिष्ठम् ।

दृश्याभमप्यमलमेव नभः प्रशान्तं

नित्योदितं प्रलयसर्गमयोदयात्म ।। ४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० जगतो ब्रह्मत्वप्रतिपादनं नाम द्विसप्तत्यधिकशततमः सर्गः

।। १७२ ।।